॥ अथ सप्तशतीपाठविघ्नघातायनमः ॥ श्रीगजाननाय ॥

॥ श्रीगणेशायनमः ॥ अथस्मार्त्तैर्यायश्चित्तानिलिख्यंते ॥ तत्रादौ आचम्यक
विशेषोनित्यप्रायश्चित्तानिवक्ष्यंते ॥ तत्रादौशौचमाह मनुः ॥ शौचेयत्नः सदाका
र्यशौचमूलोद्विजःस्मृतः शौचाचारविहीनस्यसमस्तानिष्फलाःक्रियाः ॥ सदत
द्विविधंस्मृत्यर्थसारे ॥ शौचंचद्विविधंप्रोक्तंबाह्यमभ्यंतरंस्मृतं ॥ मृज्जलाभ्यांस्मृतं
॥ बाह्यंभावशुद्धिस्तथांतरं ॥ तद्वद्दंतशुद्धिंकुर्यादितियाज्ञवल्क्यः ॥ प्रातःस्नानंतुस्म
त्यर्थसारे ॥ स्नानमूलाःक्रियाःसर्वाः स्मृतिस्मृत्कीर्तितंनृणां ॥ अस्नातश्चज
माद्यहोमजपहोमादिकर्मसु ॥ प्रातःस्नानाकरणेप्रत्यवायः ॥ सएवाह ॥ स्नाद्देवा ॥
तस्मात्यैद्विजः प्रज्ञत्वमाप्नुयात् ॥ अतएवसदास्नायादशक्तश्चेज्जपेद्धरिं ॥ त
न्मुख्यंनद्यादावितिविचित्तानेश्वरं ॥ अथशक्तादीनांसएवाह ॥ वाप्यांकूपेतडागे
वापारकेचोह्यवारिणि ॥ प्रातः स्नानेसदाकुर्यादृणेनैवसदातुरः ॥ इतिहथा ॥ ॥ २ ॥
नत्यमुष्णोदकेस्नायात्काम्येनैमित्तिकादृते ॥ इतिसंग्रहवचनमशक्तपरं ॥ एतदश

क्तौमंत्रस्नानादिवाकुर्यात् ॥ प्रातःस्नानंसंक्षेपेणकर्त्तव्यंसाग्निकैः ॥ अल्पस्वा
ल्पहोमकालस्यबहुस्वाल्पानेककर्मणः ॥ प्रातःसंक्षेपतःस्नानंहोमाद्यर्थंतद्भिष्यत
इति ॥ काश्यायनोऽपि ॥ सौभाग्यवतीस्त्रिः ॥ अस्त्रिरस्कस्नानेकाम्येनैमित्तिकं
विनाकर्त्तव्यमितिस्मृत्यर्थसारः ॥ अथसंध्याकालः ॥ आश्वलायनगृह्ये ॥ अथो
स्तमितेमंडलआनक्षत्रदर्शनादेवेप्रातःप्राङ्मुखउदङ्मुखोवाप्रतीक्षेतादर्शनादिति
॥ तत्रापित्रिविधमुक्तंधर्मसारसुधानिधौ ॥ उन्नमासूर्यसंहत्वामध्यमानुष्टतारक
॥ कनिष्ठतारकोषेतासायंसंध्यात्रिधामता ॥ तथा ॥ उन्नमानुसनक्षत्रामध्यम
नुष्टतारका ॥ कनिष्ठसूर्यसंदृष्टाप्रातःसंध्यात्रिधामतेति ॥ एवायंकालः ॥
गोणकालस्तुसंध्यान्नरमुदयंचत्रिदंडात्मकः ॥ सायंसंध्यात्रिघटिकाअस्तादुप
रिष्टात्स्वतंत्रंनिर्णयसिंधोस्कंदोक्तेः ॥ एतत्कालातिक्रमेप्रायश्चित्तपूर्वकंसंध्य

॥ २ ॥

Digitized with financial assistance from the Government of Maharashtra on 11 June 2017

स्मा॰ प्रा॰ ॥२॥

कुर्यात्॥तथावस्मृत्यंतरे॥तदयाद्वृष्टिकास्तिस्रः प्रातःसंध्यामुपासिते॥सायमस्त
मयादूर्ध्वमध्यान्हेद्वादशोर्ध्वषट्॥संध्याकालस्त्वयंप्रोक्तोनिक्षत्रिसदृतिक्रमे॥विधे
यविधिमार्गेणततःकालवतीक्रिया॥तामेवाह्यमः॥संध्याकालेत्वतिक्रांतेस्नात्वा
चम्ययथाविधि॥जपेदष्टशतंदेवीततःसंध्यांसमाचरेत्॥इति॥तथावस्मृतौ॥आरब्धो
ऽः प्राणायामत्रयंप्रातर्द्विगुणंसंगवेस्मृते॥मध्याह्नेत्रिगुणंप्रोक्तमपराह्णेचतुष्गुणं
सायाह्नेद्वादशगुणंसूर्यदृश्यातताजेदिति॥तथावगौतमस्मृतौ॥कालातिक्र
मणेचैवत्रिसंध्यास्वपिसर्वदाचतुर्थार्घ्यंप्रकुर्वीतत्रिरोव्याहृतिसंयुतं॥यद्वा॥च
तुर्थार्घ्यंतुसावित्र्याद्यावाव्याहृतिसंयुतं॥कालातीतविशुध्यर्थंत्रिसंध्यास्वपिन
स्यतः इति॥एकाहाद्यतिक्रमेतिजमदग्निः एकाहेसमतिक्रम्यपमादादक्षुतंयदि ॥२॥
॥अहोरात्रोषितोभूत्वागायत्र्याश्चयुतंजपेत्॥द्विरात्रेद्विगुणंप्रोक्तंत्रिरात्रेत्रिगुणं

स्मृते॥त्रिरात्रात्परतश्चैवश्रद्दधानसंशयः॥आचांस्यादिनाकाललोपेसएवा
ह्नायःसंध्याकालतःप्राक्तामालस्याद्विनिवर्तते॥सूर्यदृश्यमवाप्नोतिशुल्कत्वम
वाप्नुयात्॥तथा॥राक्षसोपेक्षयक्षोपेरोगार्त्तेक्षयसप्तके॥संध्यावदनविच्छित्तिर्नेदो
षायकर्मचेन॥सप्तकेमप्तकेचैवसंध्याकर्मनसंत्यजेत्॥मनसोच्चारयेन्मंत्रान्प्रा
णयामंविवर्जयेत्॥कालातिक्रमेपिदोषस्यावनिमित्तानिसएवाह॥दैवाग्निर्हिज
देवानांकार्यमहतिसंस्थिते॥संध्यादीनेनदोषोस्तियेनतत्पुण्यसाधुनेति॥स्मृ
थेसारेच॥संध्यात्रयलोपेत्वष्टसहस्रमितोसावित्रीजपेदित्यत्रकेऽशक्तौतुस्मृत्य
तरे॥पतितसंध्याकाललोपेगायत्रीशतंवाजपेदुक्तमस्मीत्यलं॥संध्योत्तरंब्रह्मया
रैऽग्निकार्यंकुर्यात्॥अग्निकार्यंविनाभोजनेपायश्चित्तमग्निविधानेमानस्तोके
जपेन्मंत्रशतवारंशिवालये॥अग्निकार्यंविनाभुक्तेनरापेब्रह्मचारिणे॥स्मृत्यर्थ

सारेत्र॥सेध्याग्निकार्यलोपेस्मात्प्रायश्चित्तसद्भावंगायत्रीजपउक्तः॥निरग्नौलोपेत्वष्टशत
मिति॥अग्निरग्नयस्त्यागेतुयाज्ञवल्क्यः॥लोप्त्वाग्निकार्यंत्वन्यत्रकार्यंसमुपस्थितमना
तुरः॥कामंत्वकीर्णइत्वान्यंजुहुयादाहुतित्रयं॥उपस्थानंततःकुर्यात्स
मासंवत्सरेनहीति॥मैत्रेयीतुमिताक्षरयामुक्तं॥अग्नेरुक्तंकर्मविधाने॥लेवोधियाज
पेन्मंत्रंलक्षमेकंशिवालये॥ब्रह्मचारीस्वधर्मघ्नश्चेत्सूर्णमेवतदिति॥अथप्रा
दुष्करणकालः॥उदादित्यास्तमयादुदित्यस्योदयादिति॥बक्ष्यायनोक्त
स्त्रिद्वरणानंतरमस्तमयोदयोयथाज्ञवेतंतथाविद्वरेत्॥तथा॥अभिदृष्टसूर्ये
अविःसूर्येवेत्या,पस्तंबस्त्वेवोक्तं॥उदयास्तमयात्सर्वेद्वरणकालइतिनि
ष्कृष्टार्थः॥एतत्प्राङ्करणकालातिक्रमनक्रमप्रायश्चित्तानावत्सर्वप्रायश्चित्तमे ॥३॥
वकार्यं॥तद्यथा॥होमकालेऽस्तमयोदयात्सर्वप्राङ्करणनिमित्तपूर्वकंसा

येप्रातर्होमंकरिष्यइतिसंकल्प्यहोमद्रव्यसंस्कारात्सर्वंसंस्कृताज्येन॥ॐभूर्भुव
:स्वःस्वाहेतिसर्वप्रायश्चित्तसंज्ञेनेवऋत्वाहोमद्रव्यसंस्कारादिप्रायुक्तकालं
होमंकुर्यात्॥ ॥अथहोमकालःप्रदीपः॥अग्निहोत्रहोमस्योदयानंतरमस्तम
यानंतरंस्वमुख्यःसायंप्रदोषोंतःप्रातःसंगवांतोमुख्यकालोदृष्टोच॥गौणकाल
स्तु॥सायंहोमस्यनिशासर्वोगौणकालः॥प्रातर्होमस्यसर्वमहर्गौणकालःअग्
न्यातराऽऽहितिकालात्सायमाऽऽहितिकालइतिबोधायनोक्तेः॥प्रदोषंतस्करजन्या
:सायमाद्यचतुर्थांभागःप्रदोषः॥दिवसस्याद्यचतुर्थांनागःसंगवइतिदीपेऽक्तं॥आ
श्वलायनश्रौतसूत्रेतु॥प्रदोषांतोहोमकालःसंगवांतःप्रातः॥अत्रप्रदोषांतोना
माष्टौनाडिकाइतिफलितार्थइतिदीपेऽक्तं॥अथसायमस्तमितेहोमकालस्तुनवना
डिकेतिस्मृत्यर्थसारेऽक्तेश्च॥तथासंगवांतःप्रातरित्यत्रसंगवांतोनवनाडिके॥

सिनारायणवृत्तिः॥ ॐसमभिमेत्यादिनवविधिहोमएवतावतिकालेक्रियमाणेन
सिद्धेसप्तवति॥इतिवृत्तावुक्तेः॥पुनःपुनःकालविधिःतमतिनीयचतुर्थीहोमात्
ऊर्ध्वयादिस्विष्टकृत्सूक्ते॥ऊर्ध्वहोमकालातिक्रमेप्रायश्चित्तमूर्ध्वंगोणकालेहो
मंकुर्यात्॥तत्रप्रयोगश्च॥ऊर्ध्वहोमकालतिक्रमनिमित्तप्रायश्चित्तमूर्ध्वंकर्मा
यमोपासनहोमंकरिष्येऽसिसंकल्प्य॥होमपात्यसंस्काराःसर्वेऽज्यंसंस्कृत्या
स्रुचिचतुर्वारमाज्यंगृहीत्वासायंहोमायवस्वनमःस्वाहा॥ॐअग्नयइदं॰॥ततोहोम
संस्कारादिहोमंसमापयेत्॥एवंप्रातरपिऊर्ध्वहोमकालातिक्रमकंप्रातरोपास
नंऊर्ध्वंचऊर्ध्वसूक्तंगृहीत्वाप्रातर्वसवेनमःस्वाहा॥ॐअग्नयइदं॰॥ततःऊर्ध्वंचहोमंकुर्यो
त्॥ॐअथहोमाधिकारिणः॥स्मृत्यर्थसारे॥होमेमुख्योयजमानःपत्नीचतथैवकन्य
का॥ऋत्विक्पुत्रिणोगुरुश्वेतास्त्रयोग्नेयःस्मृतापतिः॥एतैरेवऊनंयत्तुतद्धुतंस्व ॥४॥

यमेवत्विति॥ॐत्रायियजमानपत्न्यनुज्ञयातत्समक्षमेव॥ऋत्विगादीनांहोमा
ऽवधिकारःसएवाह॥ॐसमसंतुदेयइत्यादौतत्रंऋत्विगादिना॥द्वारंयत्समं
क्षेवदन्तिऊर्ध्वंतमनर्थकंमतिः॥अन्यादादनुज्ञांविनैवहोमादिकंकुर्यात्तत्रऊर्ध्वं
वस्त्यर्थसारेऽन्यादेपत्नेवालोकुर्वीतानुज्ञयाविना॥नोएवासौप्रवास
स्यात्यत्नीधारयतेव्रतं॥सर्वेषायजमानोद्दिश्यजेन्नादिश्नुवःशुचिरिति॥ॐ
थन्याख्यादिनिमित्तिकंकर्मसंकल्प्यादिप्रयोगात्स्पष्टीकृतंतत्॥एवंपूर्णपात्रा
दिसमाप्त्यधिकारेयंविशेषोर्थसङ्गतिर्होमंकरिष्यऽसिसंकल्प्योपासनाग्नि
संमिश्यप्राणनायम्यांसिम्नन्वाहितेग्नावित्यादिवसुषीॐआज्येनस्थंतमुक्का
पंचवारमिप्राग्नीप्रधानदेवतेवरुणप्रधानेरोषणेस्विष्टकृतमित्यादिसंद्याय
ध्यइत्येतसमिद्वयमग्नावाधायपरिसमूहनादिशूर्णपात्रनिधानांतंकृत्वाप्र

त्यगनिःपवित्रवतिप्रार्थयतहींवत्सरश्चतुरोमुष्टीनिरूप्यतत्संख्ययातावेव
ओदनस्यावघातादिकाज्यभागांतंकृत्वावदानधर्मेणचरुमवदाय॥ॐमुंचामि
त्वेतिपंचर्चस्यसूक्तस्यप्रजापतिर्योयस्मानाज्ञानऋषिः इंद्राग्नीदेवताविष्टुप्छंद
दुःस्वप्नानुष्टुप्॥राजयक्ष्मनाशनेचरूहोमेविनियोगः॥ॐमुंचामित्व
पंचऋचेनपंचाऽऽहुतीर्दुःस्वप्नदृष्टस्विष्टकृतेऽऽहुतिकारिकोक्तेः॥स्विष्टकृद्
दिहोमशेषंसमापयेत्॥ज्वरादियुतस्तत्यगतोकुर्योदितिशृत्रिः॥अथदुष्ट
स्वप्नशांतिः॥ममाशुभस्वप्नचिंताविघ्नपरिहारार्थंतथास्थानरूपप्रायश्चित्तंकरि
ष्ये॥अद्यानइतिमंत्रद्वयस्यगयाबाभ्रुऋषिः॥सवितादेवतागायत्रीछंदः॥
दुःस्वप्ननाशनार्थंसूर्योपस्थानंविनि॥ॐअद्यानोऽमुवाविश्वानिऽऋव॥ ॥५॥
यश्चद्वेषोधितियंचर्वस्यात्रिर्ऋषिः॥सोमोदेवता॥यंक्लिष्टछंदः॥विनियोगःप्राग्व

त्॥ॐयश्चद्वेषोदुष्कृतंयः॥निष्कंवाघाऽन्यः॥तदन्नायन्यः॥यथाकलोन्यः
॥अजैकपाद्याऽन्यः॥५॥॥योमेराजन्नित्यस्यगृत्समदऋषिः॥वरुणोदेवता॥त्रि
ष्टुप्छंदः॥दुःस्वप्नन्योगः॥ॐयोमेराजन्नितिऋक्॥अथसुप्तोत्थितादृशो
तयः॥ममक्षुनिमित्तदोषपरिहारार्थंजपेकरिष्ये॥एवमग्रेपि॥ममाजंघस
निमित्तदोषपरिहारार्थंजपेकं॰॥ममामनोऽदृग्नेत्रदोषपरिहारार्थंजपेकं॰
नित्यममनोऽदृग्नेत्रवत्या॥ममपायुगंधाघ्राणनिमित्तदोषपरिहारार्थंजपेदि
तिपायुगंधाघ्राणे॥ॐक्षिप्तेदूननिमित्तदोषप॰र्थंजपेकं॰॥तथाममकर्णेष्व
त्युत्पन्ननिमित्तदोषपरिहारार्थंसुचस्रामंत्रंजपेकं॰॥ॐसुचस्रांऽऽदमसी
न्योष्ण्यासंसुवंचामुखेनसुश्रुत्कर्णेऽन्यामयिदक्षंऋतूं॥निमित्तदुष्टंकर्णीयं
मंत्रंजपेत्॥अथजागम्यागमानादिप्रायश्चित्तं॥जागमनीयागमनेतु॥राजस्व

जात्यार्योगमनंनिषिद्धमितिप्रायश्चित्तोक्तस्वजात्यार्योगमनस्य॥ममजात्यार्योरजस्वजागमनज
निमित्तदोषपरिहारार्थंधनमीमेत्यिमेत्रावरुणाभ्याम्याहुतिहोष्यामीत्याज्यहोमय
क्ष्ये॥ममिदाधानयस्येतुममेत्यादिसूर्यवदुल्काराग्निधोहाष्यामि॥जपयस्येतुम
र्यवदुल्काजपेकरिष्यइतिसंकल्यस्वाहाकारयदेत्यल्काजयदितिइतिः॥म
मयाज्ययाजितजनितनिमित्तकदोषपरिहारार्थंइत्ययाज्ययाजनेजयाज्योन्य
ममार्त्विज्यमितिनिषिद्धः॥ममाज्याज्यनाजननिमित्तकृतदोषपरिहारार्थंइत्यनेजया
जनेन॥अनाज्येनशुनादीनिकंदादिचेतिइतिः॥ममाप्रतिग्राह्यप्रतिग्रहनि
मित्तकदोषपरिहारार्थमित्यप्रतिग्राह्यप्रतिग्रहे॥अप्रतिग्राह्यविषयस्यादिंजप
प्रतिग्राह्यंपुरुषंकंचेतिइतिः॥ममचैत्ययूपोपघातनिमित्तकदोषपरिहारार्थमितिचै
त्ययूपोपघातेचैत्ययूपोपघातोनिवयनस्ययूपस्यत्रीणि॥एतेषुपंचसुनिमित्तेषु

BHAU DAJI MEMORIAL

×अग्नयइदं॥ २ ॥

द्वितीयमेववक्ष्यमाणप्रायश्चित्तंकुर्यादितिइतिः॥धनमीमेत्विन्द्रियंधनमायु
र्धनमन्नंगः॥धनमेविणमेतुमोधनमोत्मणमेतुमोस्वाहा॥इमंमेवरुणश्रुध्यासोच्छ
मनयोयथास्थानमिहकल्पतां॥वैश्वानरोवाहधानोनोयज्ञंवहतुममनोहृद्यंतर
ममृतस्यकेतुस्वाहा॥अग्नयइदं॥अथाव्याधितापस्वापकालीनास्तम
यनिमित्तकंकर्मणिप्रायश्चित्तं॥अव्याधितंचेत्स्वयंतमादित्योन्यस्तमिया
द्वाग्यतोनुपविश्यत्रीन्प्रोक्षेन्मृत्वा॥ऋदितेकृतःसंभवःसूर्यमुपतिष्ठेत॥तद्य
था॥ममाव्याधितापस्वापकालीनादित्यास्तमयजनितप्रत्यवायपरिहा
रार्थंसूर्योपस्थानरूपंप्रायश्चित्तंकल्प्यं॥तिष्टन्नेवार्कमुखोयेनसूर्यतिपं
चर्चस्यसूर्यपवित्रानुष्टुप्ऋषिः॥सूर्योदेवतागायत्रीछंदः॥अस्तंस्वापप्रत्य
वायपरिहारार्थंसूर्योपस्थानंविना॥अग्नेनसूर्येतिपंचर्चोजपित्वाइतिपंच

निरूपतिष्ठत॥तथाकर्मेभ्रातः॥स्वापकालीनादित्योदयजनितश्रमस्यवायव
रिहारार्थंसूर्योपस्थानरूपप्रायश्चित्तंकृ॰॥ज्य॰॥तिष्ठन्नेव॥यस्यतेविश्वति
चतस्रणंसूर्यश्चेन्नितपाऋषिः॥सूर्योदेवताजगतीछन्दः॥उदयस्वापश्रम
वायपरिहारार्थंसूर्योपस्थानेवि॰॥ज्यस्यतेविश्वाग्निधतनेतिचतस्रुनि
रूपतिष्ठत॥उपतिष्ठविहितकर्मेभ्रातस्यनेष्यतश्रुतिकारिकायां॥नस्या
द्यकर्मेभ्रातस्येतिवृत्तिः॥अथागारोपरिकपोतोपवेशनादिनिमित्तकप्रा
यश्चित्तं॥कारिकायां॰रक्तपादः॥कपोतारण्यजारण्योकः॰शुचिछविः॥
सचेष्टोचविशेलालंसमीपंवाव्रजेद्यदि॰परियेचनपर्यंतमन्वाधानादिपूर्व
वत्॥दिवाःकपोतसक्थेनजुहुयात्सूर्यंघृतं॥तद्यथा॥ममागारेणपरिकपो
तोपवेश्मनसूर्यिताग्निरिष्टनिरासार्थंदेवा॥॰कपोतइतिपक्षेनसक्थेनाज्यहो ॥७॥

मेकरिष्यइतिसंकल्यहोमं॥जयपक्षेतुजयंकरिष्ये॥अग्निमुपसमाधाया
स्मिन्नन्वाहितेग्नावित्यादिदक्षपश्चीत्राज्येनेत्यंतंचतुर्वारं॥विश्वान्देवानाज्यभा
गेणत्यादिपूर्ववच्चस्विष्टकृत्यादेवाःकपोतइतिपंचर्चस्यसूक्तस्यकपोतऋषि
र्विश्वेदेवादेवता॥जगतीछन्दः॥अग्नेरेषपरिकपोतोपवेश्मनसूर्यिताग्निरिष्टपरि
हारार्थमाज्यहोमेवि॰॥जयपक्षेजयेवि॰॥एवंमेवगृहसमीपागमनेपिज्ञेयोदेवाः
कपोतष्पदइतिहुत्वापश्चात्स्वाहाकारंयजेत्॥विश्वेभ्योदेवेभ्यइदंनममेतस
र्वंत्यागः॥शिवाःकपोतः॰शृणुक्रु॰॥हेतिःपक्षिणी॰कपोतः॥यदुलूकोमत्यवे॥
ऋचाकपोतेषतिष्टः॰॥इतिहुत्वा॥अथधनार्थंकार्यगमननिमित्तककर्मेणितु॥
मम्धनार्थेमिथ्यर्थेवयमुस्थापथस्यतइतिप्रत्यृचमाज्यहोमंकरिष्यइतिसं॰
॥जयपक्षेजयंक॰॥अग्निमुपसमाधायास्मिन्नन्वाहितेग्नावित्यादिपूर्ववदेव

ज्ञावारमाज्यहोमंकरिष्यइतिसं०॥ज्ञयंयहेज्ञपेक्०॥ज्ञग्नेमुखंसमाधायास्मिन्न
न्वाहितेनाग्नौनेषेणत्याज्यभागांते॥वयमुत्वेतिदृग्वैश्यस्यसूक्तस्यजरद्वा
ज्ञऋषिःपृषादेवता॥गायत्रीछंदः॥ज्ञएम्यनुष्टुप्॥ज्ञर्थसिध्यर्थमाज्यहोमंवि
०॥ॐवयमुत्वायपथस्यतेऽुत्वास्वाहाकारंपठन्॥पृच्छइदं०॥ज्ञग्निनाभय
॥ज्ञदिसंतेमनः॥वियथोवाजसातये०धियं॥परिद्यंधाय॥विपृच्छन्ना०
रेधय॥ज्ञारिरवंधय॥योपूषनू०क्रुष॥यातिज्ञद्भोगा०महे॥उतनो०वीयत
॥इतिदृग्मात्रंतेऽुत्वायश्चात्स्वाहाकारंपठन्॥पूष्णइदन्नममेतिसर्वत्रस्वा
गः॥॥ज्ञथार्थेलाज्ञार्थेकर्मणितु॥ममनष्टज्ञानार्थेसंपृष्ण्विदुषानयेतिपत्नू
चमाज्यहोमंकृ०॥ज्ञयंयस्तुजयेक्०॥पृष्वेवदन्वाधानाद्याज्यभागांते॥सं
पृष्ण्विदुषेतिदृग्वैश्यस्यसूक्तस्यजरद्वाजऋषिः॥पृषादेवतागायत्रीछंदः॥न ॥८॥

पृष्टज्ञार्थमाज्यहोमेविनियोगः॥ॐसंपृष्ण्विदुषा०ब्रवत्॥ततःस्वाहेतिवदस्व
वेत्र॥पृष्टइदंनममेतिसर्वत्रत्यागः॥समु०ब्रवत्॥पृष्णश्चक्रं०यविः॥योज्ञस्मे
वसु॥पृषाणा०तुनः॥पूषन्ननु०मुत॥मोकिर्नेज्ञानं०गहि॥श्रुंवंतं०इमहे॥पूष
नव०स्मसि॥परिपूषाजतु॥इतिदृत्वा॥पज्ञान्नष्टंवेपिप्रजाकामोहंसंपृष्ण्वि
तिसूक्तेनपत्न्यश्चमाज्यहोमत्यागोप्राग्वज्ञपेद्वा॥ ॥ज्ञथयदाकदाचित्प्रवा
ज्ञजिमिष्यन्पितुपुत्रयोर्गृहेष्विष्टयोश्चयष्टव्येनगवासत्रेवाऽऋः॥त्रिष्वादिसर्ज
नादिषयागस्तंतिदृग्नासर्वैःकर्तव्यइतिवृत्तिजयंतो॥तत्रयथा॥त्रिष्वज्ञाद्या
र्थोवा॥ज्ञावम्यप्राणनायम्यदृग्काकोलाकथयित्वामुकंकर्मणःप्रेषितमार्गसं
स्थानेकर्तव्यनिरासार्थेत्रिष्वादिसर्जनंजपादिकरिष्यइतिसंकल्प्य॥प्रा
ज्ञुखोवार्यग्नेरुत्तरेणनत्रिष्वमुपवेत्रयंजपेत्॥ॐप्राणापानयोरुरुमंघासत्या

प्रपद्ये देवायसवित्रेपरिददामि॥इत्यक्तोजपित्वा॥ततःआमंत्रैरितिमंत्रस्यविश्वा
मित्रऋषेर्वृहती॥जपेविनि॥ॐआमंत्रैरिति॥ॐप्राक्त्वसीत्यक्तोजपित्वा
॥महित्रीणामितिसूक्तस्यसूक्तस्यवारुणीरादित्योगायत्री॥स्वस्ययनार्थमुना
न्यामन्योन्यमनुमंत्रणेत्रिष्वविसर्जनेविनि॥महित्रीणामवोऽस्त्वेनेत्यक्तावयो
न्यमनुमंत्रविसर्ज्यप्रवासंगच्छेत्॥एवमितिसृष्टस्यनकुतश्चिज्जयेन्नवतीतिवि
ज्ञायतइतिसूत्रोक्तेः॥एवंगुरुंविसृष्टं॥गच्छंतंपथियदार्पाक्षणेप्रियदावावोव
देतिदार्कनिकदंदेतिसूक्तस्यगृत्समदऋषिः॥आद्यात्रिष्टुप्॥परस्य
जगती॥मध्यमात्रात्रयंष्टिर्वैष्णवीसामममनोज्ञावाचःश्रवणाद्यपत्राकुनानिरा
जपेविनि॥ॐकनिकदद्धनुषमितिसूक्तंहृदयंजपित्वा॥देवीवाचमितिमंत्रस्य ॥ण॥
नैगमोज्ञार्गवऋषिः॥वाग्गायत्रीदेवताविष्टुप्छंदः॥विनियोगःपूर्ववत्॥ॐदेवीवाक्॥

एतत्सूक्तद्वयस्ययात्राकालेजपः॥कर्तव्यः॥कनिकदद्धनुषेत्सूक्तंयात्राकाले
विशेषइतिसूत्रविधानोक्तेश्च॥जातवेदसइत्येतांचस्वस्ययनार्थंसदापथिजपे
त्॥जातवेदसइत्येतांसदास्वस्त्ययनेजपेत्॥ऊर्गपथिपथियातस्यनास्यात्क्षत्रियो
ज्ञयेन्नवेदितिज्ञविधानोक्तेः॥ततःपथिगच्छन्॥यदामृगारीनोनिदितांवाचंश्रु
णोतितदास्तुहिश्रुतमितिमंत्रस्यगृत्समदोरुक्रमिष्टुप्॥मृगादीनाममनोज्ञनि
दितवाक्श्रुत्याद्यरिष्टनिरासार्थंजपेविनि॥ॐस्तुहिश्रुतं॥ततोयस्यांदिशिग्रा
मद्वाशकुनंपश्येत्यांदिशंविनीयाज्ञोदिशंपश्यन्नयतोमार्गपदीप्तमुल्मुकंस्पृ
श्यां॥प्रेक्षिपदंनवमंत्रेण॥ॐजनंयमित्रावरुणामत्यमस्वर्षिणाम्॥चन्दद्दतंप्रती
त्यमाज्ञातारंमाप्रतिष्ठांविदंतमिथोनिदीनाज्जनंयतमरक्षं॥ॐजनेनमंत्रेणोनय
न्क्षिपेत्॥ततथा॥मेथानकं॥वापसम्मात्रोटयित्वातांदिशमभिमुखवत्तःस्थित्वा॥

सेस्रुचेध्रुवमभिघारयत्यन्युस्तोपसोमस्यकर्जगती॥मेथानकन्येवकरणेवि
ॐसेस्रुचेध्रुवेमुन्नयंसमाङ्क०॥अनेनमेत्रेणमेथानकंन्येवंकरुत्वागच्छेदितिहृ
त्तिःजयतेतमन्ने॥अन्युकयोरन्यस्ताहोदित्रमग्निमुरुवंमथंन्येवंकरोति॥एवंहृ
त्तेनक्लाप्तिभवति॥यद्वासर्वामुदिसुन्नयमुत्यद्यतेनघज्ञायते॥अस्मात्पुरुषा
दन्यतोवेतितद्दा॥आचम्यप्राणेनायम्यदेशकालौसंकीर्त्यममसर्वदिक्सुद्र
तमंनवितानेकनयनिरसनद्वारश्रीपंञ्चहोतावाज्याहुतीर्होमिंजपेकरिष्य
इतिसं०॥उपलेपादिपूर्ववदग्निंप्रतिष्ठाप्यान्वाधत्तम्॥अस्मिन्नन्वाहिते
ग्नावित्यानाद्यायांरातमुक्त्रात्रप्रधानं॥अग्निंवायुंआदित्यंचेमंमंवरु
णंप्राणंछंदांसिब्रह्माणंएताःप्रधानदेवताआज्यद्रव्येणाधसंन्नरुनेनरुद्र ॥ २०॥
मित्यादिसमिद्वयमग्नावाधायपरिसमूह्याद्याघारौतेचस्रुचीवज्रंस्रुवाहुती

मुद्यात्॥ॐपृथिवीहृतासाग्निनाहृतायाहृतयावर्त्रायस्माच्चयाद्विप्रि
सद्वारयेस्वाहा॥अन्तरिक्षंहृतंसद्वायुनाहृतेनहृतेनवर्त्रेणय
स्मा०वायवयद्दं०द्यौर्हृतासादित्येनहृतायाहृतयावर्त्रायस्मात्०आदि
त्यायेदं०॥दिशोहृतासाश्चेद्रमसाहृतास्तानिर्हृतावर्त्रीर्निर्यस्मात्०चंद्र
मसदद्दं०॥आपोहृतास्तावरुणेनहृतास्तानिर्हृतान्निर्वर्त्रीर्निर्यस्मात्०वरु
णायेदं०प्रजाहृतास्ताःप्राणेनहृतास्तानिर्हृतानिर्वर्त्रान्निर्यस्मात्०प्राणायेद
म्॥वेदाहृतास्तच्छंदोभिर्हृतास्तेहृतेवर्त्रैर्यस्मात्०छंदोभ्यद्दं०॥सर्वंहृतंतद्ब्र
ह्मणाहृतेनहृतेनहृतेनवर्त्रेणयस्मात्स्वाहा॥ब्रह्मणद्दं०एतास्तिस्रोवाज्याहुतीर्जु
होत्यग्नेरीक्षणंयादित्यवस्थायस्वस्त्यात्रेयजपतियतद्दजनयामहइतिच
सक्रुत्रेषं॥तद्यथा॥स्वस्तिनोमिमीतेत्वर्चसेस्यात्रिविष्वेदवाआद्यास्तिस्वस्ति

हुन्नोद्वेवुश्नोजयेवि॰। अस्मस्तिनइतिपवर्वजपित्वाइत्यरिलावासप्तर्चो
जपित्वायतइंजेतियंणेकाण्वःप्रगाथइंद्रआह्यातृतीयापंचम्योबृहत्योद्वि
तीयाचतुर्थीषष्ठ्यःसतोबृहत्यःजयेवि॰। अंयतइंद्रेतिषल्चोजपित्वापूर्व
वदुपविश्यस्विष्टइंद्रेसन्नहनहोमादिप्रायश्चित्तान्तादिहोमंत्रोषेसमाप्यक
र्मेश्वरार्पणंकृत्वा॥ प्रवासगमनेनकुलक्षयंनवतीतिवृत्तिजयंतो॥ महाध्व
गमननिमित्तकर्मणितु॥ममममहाध्वानगमनेसंभावितानेकदुरवनया
दिपरिहारार्थंसेषुषन्नश्वनइतिसूक्तस्यकण्वऋषिः॥ पूषादेवतागाय
त्रीछंदःमहाध्वगमनेसंभावितानेकदुःखपरिहारायधनावाप्त्यर्थंजप्ये
होमवि॰। जपेप्तेतुसूक्तजपेकरिष्यइतिविशेषः॥ संपूषन्नश्वनइतियावा ॥१२॥
कालेसदापठेत्॥ अन्ययनचिरंयातिकार्यसिद्धिंनैवदिति॥ अरिष्टघ्नोक्तो

स्मा॰ अन्येश्वश्वनिव्याघ्रादिभ्योनयंकरमार्गगमनेतुममसंभावितव्याघ्रा
दिनिवृत्त्यर्थइतिविशेषः॥ ॐसेषूषन्नश्वनसिर॰॥ इतिदुरुक्त्वातत:स्वाद्
तिवदन्॥ पूषन्नेहि॰॥ १॥ योनि॰ जहि॰ २ अपत्ये॰ २ज॰ ३ त्वंतस्ये॰ तवृष्टि
॥ ४ ज॰ तन्नि॰ दयः॥ ५ अधानो॰ कृधि॰ ६ ज्ञातिनः॰ विदः॥ ७ ज्ञानि॰ विदः
॥ ८ ज्ञाधि॰ विद॰ ९ नपूषणं॰ मीमहे॰॥ १०॥ स्विष्टकृदादिहोमंत्रोषेसमाप्ये
त्॥ अथप्रवासोपरथानं॥ ॥ तत्रप्रवत्स्यन्नोपासनाग्नेरुत्क्रान्त्याप्राणना
थस्यधनोपार्जनार्थंप्रोषितभार्युपस्थानंकरिष्यइतिसं॰। अग्नेःपक्रान्तिरग्ने
र्वाप्रयवोभयंमेस्तु॥ इत्युपस्थायप्रवासंगच्छेत्॥ दशरात्रादूर्ध्वंमासिक
प्रवासेत्वेतत्प्रवासादित्यस्नात्वाग्नेयंस्नात्वाचस्यप्राणनाथस्यप्रवासाद्
गतोरुमनस्वत्याचक्रगृहीतमाज्यहोममग्न्युपस्थानादिकरिष्ये॥ आज्यंस॰

स्कृत्यसुचिवसुर्वारमाज्ये गृहीत्वामनोजूतिरितमंत्रेणसर्वप्रायश्चित्तेऽज्यान
यंवोजनयेमेसख्यायसख्यायकर्मणेआप्यायध्वमघ्न्याइंद्रायभागंप्रजावतीरनमीवा
:स्थेवोस्मासुवप्रजायध्वंमाववोगोपतीरिषत्॥इत्यनेनगृहंसंवीक्षतेत
प्रविशेत्॥गृहानहंसुमनसःप्रपद्येवीरघ्नोवीरवतःसुवीरान्॥इरावहंसर्वमि
तमुक्षमाणःस्योनंहसुमनाःसविशेत्॥नोतिगृहंप्रविशन्निवेशनंमेत्रायोःमै
योरितिमंत्रमसकृदुच्चारयन्वीक्षमाणःप्रपद्येत॥ततःपाञ्चजन्यजुषोमो
:स्वधृतःपरस्मुरवज्येष्टानुपूर्व्यंणघृताणंत्रिरुत्तान्योपणिन्यायपिंड
ह्यत्रिरवघ्रायततोजपेत्॥अंगादंगात्संभवसिहृदयादधीतिपश्चाज्जपंत
तिवृत्तिजयंसो॥कुमार्यौजन्यमंत्रकंत्रिरुजिघ्रेत्॥दत्रारात्रावधीकृत्वा
नमनेवमनोज्योतिःषायश्चित्ताहुतिर्नेनवति॥श्रोतंग्रथ्नेवमेवावगतंग्र्थ॥

इतिप्रवासोपस्थानं॥अथोपासनानुगतप्रायश्चित्तं॥आचम्यप्राणानायम्योपासना
ग्निंप्रतिष्ठापनस्वयमुपवासान्योघनरुसादयिष्येइतिसंकल्प्यपल्वलपवासम्
स्तुमेसोपासनश्रोतमौसनाग्निप्रतिष्ठापनपल्वलपवासान्यामुसादयिष्यइति
संकल्प्य॥अथकारिका॥औपासनोनुगच्छेद्वेदुपलिपादिपूर्ववत्॥आहृत्यश्रो
त्रियागारास्थितिष्ठथहविर्नेनं॥अन्यस्मादौमकालास्त्रीनाग्नीयाद्यदिवागृही॥
॥तथा॥ममानुगतसौसनमयाग्नेयनयाज्यांतिर्हुत्वाघनरुत्वाद्यइतिमंत्र
ज्यंजायतनाम्नासमोद्याश्रोत्रियागारस्थमुपलेपादिपूर्वमग्निंप्रतिष्ठाप्यपरि
समुह्यपरिस्तीर्यपर्युक्ष्याज्यंसंस्कृत्यस्रुवेसंमृज्याग्निमज्वलंकृत्य॥जयाद्यति
विमदोऽग्निःपक्तिः॥औपासनानुगतप्रायश्चित्ताज्यहोमविधिः॥अथाज्यहोमे
नेषजंस्वाख्य॥अथासेनयदंसर्वप्रायश्चित्तंकरिष्ये॥ॐभूर्भुवःस्वस्वहाप

जापतइदं०।ततःपरिस्तरणानिविसृज्यपरिसमुह्यपर्युक्षणंकृत्वोत्तरेण इत्क
पस्यायकालप्राप्तहोमंकुर्यात्॥पत्युर्यज्ञमयसेतुपूर्ववत्संकल्पानंतरम
ग्निस्थापनेकृत्वाकालप्राप्तहोमंकुर्यात्॥पत्नीतुतस्माद्धोमकालादारभ्य
न्यहोमकालपर्यंतमुपवसेत्॥यजमानोपवासपक्षेप्येवमेव॥यजमानेप्रो
षितेपत्न्यामृतुमत्यामप्यनुगतेनाधानुगताग्निस्थापनप्रायश्चित्तादिस्विष्ट
कृदाकारयेदितिबोधायनः॥आहिताद्दर्शादिनोत्तमान्युत्तानिप्रकारायं
तदुत्तरेषनःसेधानमेवेतिशाट्यायनिः॥इत्यनुगतप्रायश्चित्तं॥॥अध्यान्वाहिता
न्यनुगतप्रायश्चित्तं॥अन्वाहिताग्नेर्यागात्प्रागनुगतेश्वेवंदिनिमुख्या
द्यान्वाहिताग्नेःप्राग्यागादनुगतनिमित्तंपुनरन्वाधानेप्रायश्चित्तंकरिष्य
इतिसं०अन्वाधानसमिधावग्नावैधायाज्यंहुत्वाःस्विष्टकृत्पर्यायसर्वप्रा ॥१३॥

यश्चित्तंहुत्वास्थालीपाकंकुर्यात्॥अन्वाधानोत्तरंप्रयाणनिमित्तक्रक
र्मणिकं॥ममान्वाहिताग्निप्रयाणनिमित्तेनुर्यंताइतिसंकल्प्याज्याहुतिंदत्वा
इतिसंकल्प्यसंस्कृताज्येनतुर्यं ताइतिमंत्रस्यागनीकृर्षिःविरुपोदेवता
गायत्रीछंदः॥अन्वाधानोत्तरंप्रयाणनिमित्ताज्यहोमेविष्णुंतुर्यंजा
अग्निं रस्तम०मिरेस्वाहा॥अनइदं०सर्वप्रायश्चित्तंहुत्वाविधिवद्द
क्षिणेसमारोप्यगच्छेत्॥॥अथोपासनहोमलोमप्रायश्चित्तं॥॥ममोपासनहो
मलोपजनितप्रत्यवायपरिहारार्थंमनसात्मावृतुगृहीतमाज्यंहोष्यामि
इतिसंकल्प्यपर्युक्षणाद्याज्यंसंस्कृत्यस्रुचिचत्रगृहीतेगृहीत्वामनोज्यो
तिरितिमंत्रेणस्वाहेतिमनसेज्योतिषइदं०सर्वप्रायश्चित्तंकुर्यात्।दाद्या
दिनपर्यंतमिदमेकंकाज्याहुतिप्रायश्चित्तमितिकारिकायां।तदूर्ध्वमग्नि

नाशिःघन: सेधा॥नमेवेतिपयोगारभे॥इतिहोमलोपप्रायश्चित्ते॥अपघन:
सेधाने॥ममयावत्कालंगृह्याग्निर्विच्छिन्नदोषजनितप्रत्यवायपरिहारार्थं
जातविच्छेदहेतुमसंख्यैरुक्तप्रायश्चित्तमेकप्रत्यामायेनकरिष्यइति
सं॰दधातीकुर्वीयातां॥ततोगृह्याग्निर्विच्छेदहेतोरादास्याद्ययावत्खलु
मासायंप्रातर्होमानांतत्पादर्शपूर्णमासस्थालीपाकानांवहवनीयऽन्वध्य
सेवनानांगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजे॥इतिसंकल्प्य॥ममविच्छि
न्नस्यगृह्याग्नेःघन:सेधानंकरिष्ये॥अपलेपाद्यग्निप्रतिष्ठापर्यन्तम
न्याहितेनाविस्रंसादिप्रायश्चित्तेनत्रिरग्निंपवमानेऽग्निंप्रजापतिं
चाज्येनाज्यमाग्नेवरुणान्निर्वृषाग्निंप्रजापतिंत्वलाजऽव्येणसूर्यंसवि ॥२४॥
त्रीयेनर्चावीरमाज्येनत्रीषेणस्विष्टकृतमित्यादिवक्षुधीवर्जं॥अग्नआयंषी

तिसिरवृणाग्नंवैश्वानसाऋषय:अग्नि:पवमानोदेवतागायत्रीछंद:।
घन:सेधानाज्यहोमेविऽअग्नआयंषीतिसमिधंहुत्वा॥अग्नयेपवमा
नायदे॰त्वमर्यमावसुश्रुतोग्निस्विष्टकृ॥विनियोग:पावत्॥ऽअत्वमर्यमा॰
वरुणोसिस्वदा॰॥अग्नयइदं॰॥प्रजापतेऽदित्यगर्भ:प्रजापतिस्विष्टकृ॥वि॰
मा॰॥ऽअप्रजापतेत्वमेतास्वदा॰॥प्रजापतयइदं॰ततःप्रक्षालितेयज्ञंजनो
पतिराज्येनोपस्तीर्यद्विर्लाजानोप्यंवावत्रीवित्रिरोप्यत्रिर्पीडंजिघ्रा
त्यंमेघायतिष्ठत्यापत्यंजनिष्वाजनोऽधत्स्व॥अर्यमाग्निंवैरुणि:पूषा
मरनुष्टुप्घन:सेधानप्रधानलाजहोमेवि॰अर्यमाद्विर्जिह्वेत्वा॥अ
र्यमाग्नयेवरुणाग्नयेपूषाग्नयइदं॰ततःऋषेऽदनसवोनयतिपत्नीभ्या
मप्रजापतिंमनसाध्यायन्नुज्रुयात्॥प्रजापतयइदं॰ततःपत्नीमुपवेशय॥

आनः प्रजामित्यनसृणंसूर्यासावित्रीसूर्यासावित्रीत्याहाऽऽज्यतोद्विरुत्तरया
द्विरुत्तरया॥ अंसेद्वेऽनुष्टुभौ॥ पुनःसंधानघधानाज्यहोमविधिः॥ आनः प्रजा
मित्यनसृणंसूर्यासावित्रीत्याऽऽज्यस्रुतोर्दुत्वासूर्यासावित्याऽऽदं॥ समंजन्वित्यस्यसूर्यासावि
त्रीसूर्यासावित्यनुवेष्टुं॥ दधिप्राशानपक्षेदधिप्राशनेऽऽज्यशेषेणवाऽऽदधा
जनेविधिः॥ ॐसमंजन्वित्यंजनेनमंत्रेणस्वयंप्राश्यपत्नीप्राशयेत्स्विष्ट
कृदादिहोमशेषंसमापयेत्॥ इतिपुनःसंधानविधिः॥ ॥ अथेष्टिप्रायश्चि
त्तानिप्रयोगपारिजाते॥ ॥ प्रतिपद्यष्टविद्यायांयदिदृष्टिःसमाप्यते॥ पु
नःपौर्णमासेष्टिःकर्त्तव्यायागचित्तेमरिति॥॥ प्रमादादन्याग्नौचेत्स्व
यंयजतेस्वाग्नावन्योवायजेच्चेन्नरातुममान्याग्नौस्वयंयजननिमित्तेपर्वा ॥१५॥
ऽकृत्स्थालीपाकंकरिष्यइतिंयद्यमामाग्नावन्ययजननिमित्तेपर्वाऽकृत्व

र्णेष्टुतिपक्षेतुपर्वाऽकृत्स्थालीपाकस्यस्थानेदर्शेष्टुतिपक्षेत्वमीसिनंकर्त्स्यंक
रवाणनस्तरीयादितिथिद्वयधानपूर्वकमिष्टिंकुर्यात्॥ ॥ अथाप्तिप्रायश्चित्त
योगपारिजातः॥ ॥ अन्वाधानसर्वेवैस्वीरजस्वलानववसितदाधेवमादिदि
वसेसद्यस्कालाधानसर्वेवंस्थालीपाकंकुर्यात्॥ अन्वाधान्वात्यरजस्वीर
जस्वलाचेन्नोगृहांतरंस्थापयित्वाप्रतिपद्येवःस्थालीपाकःकर्त्तव्यः॥ स
तिकादिनेष्टिरतीवाचेदागामीपर्वैतिथिर्भवेद्यदितृतीयंचतुर्थीनवमीचतुर्दशीवि
हायान्यासुतामतिपन्नेष्टिप्रायश्चित्तंविनैवकुर्यात्॥ तदाह्वयोगपारिजा
ते॥ स्वकालेष्टिरकृत्वातृतीयादित्यत्रस्वकालत्रुटिनागामीचतुर्दश्यंतः
कालोविवक्षितः॥ अनेतरपर्वणिचपौर्णमासेष्टिरकृत्वैवमतीतयागंकुर्यात॥
तदाह्वयोगपारिजातेजगन्नाथःस्थालीपाकादतिक्रामेदादितिद्वयमु

स्थालीपाकाद्यतिक्रामेदाप्तिरित्यनेकु

त्रचित्॥दिवसेतत्रकुर्वीतमेतत्तुस्मार्त्तकर्मणः॥तत्रार्थेयद्यतिक्रांतमेकां
र्यंपर्वण्यनंतरेपथिकृद्वोमपर्वतुकर्त्तव्यमवधानतः॥चरुनिर्वापणंत
त्पूर्वंपथिकृतागन्ये॥ज्ञन्येह्यहन्यन्यस्तदपरंजुह्याक्रमात्॥अ
न्यतुपथिकृद्वोमस्यतेचकर्ममेनिरे॥तत्तुकृत्वाघनस्तंत्रघणीतासाद
नादिकं॥निर्वापेन्नाक्षणेकृत्वाचरुःपथिकृतेग्नये॥ज्ञथार्धरहस्तंत्र
चयथाविधिसमाप्यच॥ज्ञतिक्रांतेचकुर्वीतस्थालीपाकंततःपुरेति
॥ज्ञस्यार्थःपतिपदिकर्त्तव्यस्थालीपाकस्यातिक्रमेणाग्नीचतुर्दै
शीपर्वतेनुतिथिश्चेयंकुतस्थालीपाकः कर्त्तव्यः॥ज्ञाह्याप्यतिक्रमेमेतरप
र्वण्यवपथिकृत्पूर्वेकालातियजनयागंकुर्यादिति॥तत्रापितिथिविशेष ॥२६॥
माहाचार्यैःस्मृतिरुपेण॥ज्ञुनेरुनितुकार्यास्यात्प्रदृष्टिःपश्चात्ततःपरैः॥

नीतीतिदृष्टिश्चतुर्दश्यांचतुर्थ्यांमध्यंपर्वके॥नवम्योवद्वितीयायांकार्याह्यनु
तयस्तथा॥मध्यंपर्वकेमध्यपर्वमध्ये॥ज्ञदृश्यंनित्यर्थः॥येचकेपंचमदिवसे
यत्रम्यांनेत्यर्थःयत्तुवैष्णिकायामुक्तं॥योर्णमासस्येदर्व्यंहोतावायदक्षि
णेत्त॥तदर्द्धर्चुयादेवममावास्यायेतिच॥हव्येहविःहोतारुत्विक्।
ज्ञनेवंकृत्वापश्चिकृतोवैश्वानरोवाज्ञतिपन्नकार्यः॥एतदर्थयावदन्य
त्पर्वणेनकालः॥तत्रोक्तप्रायश्चित्तमेवघनरात्रियज्ञानुष्ठानोऽधिका
रीतरावरोधनकालइति॥तदेतत्सर्वंतरविषयमेवेतिप्रयोगपारिजा
ते॥ज्ञाश्वलायनानांतु॥ज्ञतिपन्नेष्टितिर्यंतरंग्रहणात्॥पर्वद्वयातिक्र
मेणनिर्णयमाह्काशिकाकारः॥ज्ञन्यातिक्रमेकार्यएकःपथिकृतःश्व
रुःतृतीयघनरात्रोनांतुपर्वणमतियातेन॥घनरोधयमिछेतिकेचिन्मन्यं

विदोद्विजाः॥ इतिप्रयोगपारिजातेऽनेनकः॥ दृष्टित्रयसमायोगात्स्मार्ताग्नि
ः संक्षयमृच्छतिद्वयोर्योगेतुकार्य्यास्यादृष्टपूर्णेन्दुतिथैतैः॥ वह्निष्टीनांसमायो
गात्स्मार्ताग्निःसंक्षयंव्रजेत्॥ क्रोताग्निरुद्वयोर्योगेकार्यकल्पेक्रमिष्यु
तिरिति॥ स्मार्तश्रौतेषुजातेषु॥ दर्शेऽह्निपौर्णमासीचेत्तुल्योष्टद्वयमेकचा॥
एकस्यादरुद्वयोरह्नेनचेतिते॥ अथेतस्ययोगः॥ ममदर्शीयोर्णमासद्वा
लीपाकातिपत्तिजनितप्रत्यवायपरिहारार्थंपश्चिमद्यागपूर्वकमतिपन्न
स्थालीपाकंवाकृत्वातस्यपूर्णेन्वाधानेकुर्यात्॥ अत्राप्यतिक्रमेतिपन्नया
गस्यादरुद्वेप्रायश्चित्तंकृत्वाकालप्राप्तंप्रतिपदिष्टंसद्यस्कालान्वाधान
पूर्वकंकुर्यात्॥ तत्रममदर्शीयोर्णमासातिपन्नस्थालीपाकजनितप्रत्यवायप ॥२७॥
रिहारार्थंपादरुद्वेप्रायश्चित्तंअमुकप्रत्याम्नायत्वेनकरिष्यइतिसंकल्प्य

दर्शस्थालीपाकं

कृत्वासद्यस्कालान्वाधानपूर्वकंप्रतिपदिष्टंकुर्यात्॥ द्वितीयपर्वातिक्रमे
पूर्ववदागामीपर्वमध्येकुर्यात्॥ तत्राप्यतिक्रमेतत्पूर्णेपश्चिमकृत्पूर्वकंका
र्य्यं॥ यश्चिकृदिष्टस्वत्रेतावाकुर्वीतेत्यसमानतंत्रोवाकुर्यात्॥ तस्याप्यतिक्र
मेतृतीयप्रतिपदिदुक्तंतन्नद्वयप्रायश्चित्तंकृत्वाधिकृत्यप्राप्तकालमिष्टिं
कुर्यात्॥ तत्रममदर्शीयोर्णमासस्थालीपाकातिपत्तिजनितप्रत्यवायपरिहारा
र्थंपादरुद्वेप्रायश्चित्तंकरिष्यइतिसंकल्प्यंकृत्वाचप्राप्तकालमिष्टिंकुर्यात्॥
तस्याप्यतिक्रमेऽग्रागामीपर्वयंतत्पूर्वोक्तवदेवकुर्यात्॥ तत्राप्यतिक्रमे
स्मार्ताग्निर्नश्यति॥ पूर्वोक्तघनराधेयघनःसंधानेकृत्वाप्राप्तपर्वणिप्रतिष्टि
कुर्यात्॥ घनराधेयंतुस्थालीपाकत्रयातिपातेचतुर्थपर्वातिक्रमेचस्थाली
पाकत्रयातिपातेबोध्यं॥ दिरण्यकेत्रीगव्यसत्रे॥ यदिपर्वणिविच्छेदोमन्य

स्मा॰श्रा॰ ग्निकृतेनयाज्येपद्यादिद्वौवैश्वानरयग्निकृतोयदिवदुस्युनराधयमितितद्य
॥१८॥ था॥ममविच्छिन्नस्यगृह्याग्नेःघनरस्मुत्यत्यर्थंजयेतायुक्तंघनराधयेकर्म
ष्टृतिसंकल्प्य॥अग्न्याधेयीकसंभारेष्वग्निंप्रतिष्ठाप्यपर्यूहनाद्याज्यसं
स्कृत्याज्याच्छेषंस्रुवादुतिसर्वंघायश्चित्तेवदुत्वापर्यूहनेत्रोक्षणंकृत्वा
कुर्यात्॥समारूढसमिन्नाशेसमिज्जवोवाद्यमग्न्युत्पत्तिः॥तत्रममसमा
रूढसमिन्नाशजनितपत्यवायपरिहारार्थंवाघनराधयेकरिष्यइतिसं
कल्प्य॥विशेषः॥इतिकारिकाद्युक्तंघनराधये॥अन्वाधानेष्टिमध्येचे
त्ग्रहणंचेन्नोनक्तंप्रायश्चित्तेकुर्यात्॥तद्यथा॥दृष्टिमध्येदविरासाहनीते
ममन्वाधानेष्टिमध्येचेदोपरागजनितंवेगुण्यपरिहारार्थंअग्नाहोगोरित्यका
ज्याहुतिनवोनवदुत्यंपस्त्यानेकरिष्ये॥अग्नाहोगोरित्यरातुरलोगोतम
स्य

MEMORIAL

ग्वेऽमागायत्री॥दृष्टिमध्येचेदोपरागवेगुण्यनिरासार्थमाज्यहोमविं॰ऊर्ज
ग्नाहोगो॰गृह्णस्वाहा॥चेऽमसदृक्षं॥सवैतत्तत्रत्यायनवोनवइत्यस्यसूर्यो
सावित्रीसूर्यासावित्रीचेऽमास्त्रिष्टृप्चेदोपरागवेगुण्यनिरासार्थमुपस्था
नेवि॰॥ऊंनवोनवो॰मायुः॥ततदूर्ध्वाधानादृष्टिप्रक्षानहोमः॥एवंसूर्यग्रह
णेतुसंकल्पादोषयोरुक्तयो॥उद्वयमित्यस्यप्रस्कण्वःसूर्योनुष्टुप्॥सूर्यापरा
गवेगुण्येत्यादिसूर्यवत्॥ऊंउद्वयंतमसस्परि॰ज्योतिरुत्तमंस्वाहेतिसूर्यायेदं॰स
वेषायश्चित्ते॥चित्रंदेवानामितिकुत्साःसूर्यस्त्रिष्टृप्॥सूर्योपस्थानेवि॰ऊंचि
त्रंदेवा॰षश्चेत्कृपस्थायदूध्वानादिकुर्यात्॥दूरेन्वाधानेष्टिमध्येग्रहणप्रा
यश्चित्ते॥ ॥अन्वाधानेष्टिमध्येप्रयाणेपस्थिते॥ ॥ममान्वाधानेष्टिमध्ये
प्रयाणेवेगुण्यनिरासार्थंतुर्यातादृक्कृच्छ्राज्यहोमेसमारोपेचकरिष्ये॥ऊंआज्यं

संस्कृत्य॥ कुम्भंताङ्गिरसोग्निर्गायत्री॥ आज्याधानेष्टिमध्येप्रयाणनिमित्त
माज्यहोमेवि॰ ॐकुम्भोताङ्गिरस्तम॰ यमिरेस्वाहा॥ अग्नयइदं॰ सर्वप्रायश्चि
त्ते॥ अरण्यादिषुग्निसमारोप्यहोमकालेग्निंप्रत्यवरोह्यप्रातर्होमानंतर
मिष्टिंकुर्यात्॥ इतिप्रयोगपारिजाते॥ आज्याधायप्रतिपदिप्रमादादिदर्शो
करणेप्रातरपासनोत्तरंकृत्वाज्याधानयागाकरणजन्यवैगुण्यनिरासा
र्थंव्यस्तसमस्तव्याहृतिभिराज्यहोमे॰ इतिसंकल्प्य॥ आज्यंसंस्कृत्य॥ व्य
स्तसमस्तव्याहृतिभिर्हुत्वाग्नपनरन्वाधाययागंकुर्यादितिप्रयोगपारिजाते
॥ यजमानेप्रोषितेद्वैतोपल्लवादिकृत्विगादिनाग्निंसमारोप्यारण्यादिपल्या
दायगच्छेदितिबोधायनः सर्वत्रगतेकर्मणियजमानस्यार्द्धांगत्वेनस्वयंहोतो
द्विसर्गस्यमंमेवरुणेतत्वायामीतिस्रुवाहुत्वा॥ गंधाद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं
ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं॥ इतिश्रीं॥ ॥१९॥

नमोमेवित्तियंकृत्वेजपेदितिबोधायनः॥ तथा॥ आज्याधानोत्तरंयजमान
स्यरेतोविसर्गेप्रधानेंगंसूर्वंममाज्याधानोत्तरंस्वप्नेरेतोविसर्गेवैगुण्यपरि
हारार्थंमिमंमेवरुणतत्वायामीतिद्वाभ्यामाज्याहुतीरविपृजांजयंश्चकरि
ष्यइमंमेवरुणतत्वायामीतिद्वाभ्यांवक्ष्यमाणऋग्भ्यांचस्वप्नेरेतोविस
र्गेवैगुण्यनिरासार्थेमाज्यहोमेवि॰ ॐइमंमेवरुण॰ चक्रेस्वाहा॥ ॐतत्वा
यामिमोषीःस्वाहा॥ वरुणायेदंनममेतिद्वयोः सर्वेप्रायश्चित्ते॥ तथारीवे
पृजांजपंकुर्यादितिबोधायनः॥ तत्रबुद्धिपूर्वंरेतोविसर्गेतुजयेव्रतपतयेस्वा
लीपाकंकुर्यात्॥ ममबुद्धिपूर्वंकरेतोविसर्गेवैगुण्यनिरासार्थंमग्नयेव्र
तपतयेस्वालीपाकंरविपृजांजपेनमोमेवित्तियमित्यृचैवेतिबोधायनस्
त्वेदीपोक्तेश्च॥ ॥अथनमित्तिकप्रायश्चित्तानि॥ ॥अर्घाकक्षाम्यापरा

सान्वङ्गाग्निरायतनाद्बहिर्गमननिमित्तप्रायश्चित्तेकरिष्ये॥ इदंतइत्यस्यह
दुवधोविश्वेदेवास्त्रिष्टुप्प्रजाग्निनिर्हरणेविष्वङ्न्यदृदंतश्चकं॰जनित्रेद
तिमंत्रेणाग्निमन्तःप्रक्षिप्याज्यंसंस्कृत्यसर्वंप्रायश्चित्तंहुत्वा॥ग्राम्याय
मोनाग्निसमीपेवपनविष्टयज्ञमानः षट्त्रिंशादंतेभितः ग्राम्यादायतः प्र
क्षिपेतग्राम्यायावहरंगच्छतितावदेनमपरिमतइतिमंत्रेणसंस्थेथेवमगं
तत्रहोत्रावलोकेश्रुतावप्येवं॰ग्राम्यापरासदेग्राद्धरग्निगमननिमित्त
प्रायश्चित्तमनयेस्थालीपाकंकरिष्यइतिसंकल्प्यश्वेवदग्नावग्निप्रक्षि
प्याग्नयेपथिकृतेस्थालीपाकंकुर्यात्॥ इर्णेहुतिर्वाग्नयेपथिकृतेस्था
दैवेवरूपा॥ बह्वीनामेकदेशापहारेमनस्वतीस्वकंप्रायश्चित्तंवदि ॥२९॥
कायांनान्यत्र॥ ममोपासनाग्नेरेकदेशापहारेवेगुण्यंनिरासार्थंमनस्व

स्वेकाज्यादुतिर्होष्यामि॥ ॥इध्माधानोत्तरंहविर्दोषेतुदुष्टहविस्थानेशु
ज्यप्रतिनिधिंकृत्वास्थालीपाकंसमाप्यदुष्टहविरसुपस्थिप्यान्वाधाना
दियागः पुनःकर्तव्यस्तत्रममेध्माधानोत्तरंहविर्दोषनिमित्ततदेवताक
स्थालीपाकंकुर्यात्॥ इध्मानास्तर्वंहविर्दोषनिमित्ततदेवताकंदविः पुन
रुत्पादियेष्यं॥ तदुत्पाद्ययथापूर्वंजुहुयात्॥ अंगदग्धदोषेतु॥ममांगदग्धदो
षनिमित्तमंगदग्धविः पुनरुत्पादियिष्ये॥ ज्ञाज्यंपुनरुत्पाद्यांगदोषंसमाप
यत्॥ ततःसिष्टकृदर्थंहविर्देयेतुनिमित्तमाज्येनसिष्टकृदाद्यंगंकरिष्य
तिसंकल्प्याज्येनैवसिष्टकृतेकुर्यात्॥ दोषस्तु॥ प्रच्युतेस्तुनरक्तः कृष्णः की
टैर्वामिश्रंसविनिःवमासकशुक्रमज्जास्थिमूत्रविट्स्वेददूषकैः॥ ऊनषा
ड्यंगपर्वानेसदुष्टानिस्युर्दोषितु॥ निन्दानिवेत्तिसक्थानिदुष्टानिस्युःस्त्रि

पेज्जले॥तथा॥स्रुक्वेतन्निद्येतर्त्यन्यामाद्त्यजुहुयाद्वि:॥वानस्पत्या
न्निम्नान्निम्नादद्भ्यस्त्वोष्पित॥इतिकारिकायां॥ ॥अन्यगृह्याग्निसं
सर्गेतु॥ममान्यगृह्याग्निसंसर्गदोषजनितप्रत्यवायपरिहारार्थंजग्न्येवि
विचयस्थालीपाकंकरिष्ये॥अग्निद्वयस्याग्नेयोयुगपद्वसमिधौगृहीत्वा
तस्मिंस्संसृष्टाग्निसमारोपमंत्रेणप्रताप्य॥अङ्गाग्निरितिमंत्रस्यवामिष्ठो
ग्निस्त्विष्टकृ॥अन्यगृह्याग्निनास्वाग्निसंसृष्टद्विधाकरणेविनियोग:॥ॐ
अङ्गाग्निरोमतयो॰मानुषाणं॥इतिमंत्रेणविभज्यतंदेवेभ्योक्तिनेप्रतिष्ठा
प्यस्वस्वसमिधंप्रत्यवरोहतिनिक्षिप्याग्नेयेविविचयेस्थालीपाकंकुर्यात्
॥औत्तरवेदिकंगंतव्यं॥निर्वपणेतु॥आग्नेयेविविचयेत्वाजुष्टंनिर्वपामीत्याग्न
येविविचयेस्वाहेतिजुहुयादन्यत्समानं॥यद्वा॥अग्नेयेविविचयेस्वाहेति ॥१२७॥

पूर्णाहुतिः॥अग्नेयेविविचयइदं॰॥इदंसर्वंत्यक्तायाग्नेयस्थालीपाकेजुष्ट
पूर्णाहुतिरितिबोद्धव्यं॥गृहदाहेतु॥ममगृहदाहनिमित्तमग्नेयेस्थालीपाकं
स्थालीपाकंकरिष्येअग्नेयेसामवतेस्वाहेतिनामदेवतायैनिर्वपत्यागोस्त:पू
र्णाहुतिर्वा॥ग्रावाग्निनागृह्याग्निसंसर्गे॥ममग्रावाग्निनागृह्याग्निसंस
र्गजनित॰र्थमग्नेयेऽष्टाकपालेस्थालीपाकंकरिष्ये॥अग्नेयेऽष्टाकपालेनामदेवता
यैनिर्वपत्यागोस्त:पूर्णाहुतिर्वा॥पंचमाग्निनासंसर्गेतु॥ममपंचमाग्निना
गृह्याग्निसंसर्गनिमित्तमग्नेयेसंसर्गीयस्थालीपाकं॰॥अग्नेयेसंसर्गीये
स्वाजुष्टनि॰अग्नेयेसंसर्गीयस्वाहेतिपूर्णाहुतिर्वा॥ग्राम्यपंचमाग्निरिति
हरिः॥ ॥वैद्युतनस्वगृह्याग्निसंसर्गनिमित्तमग्नेयेक्रमंतेस्थालीपाकंक॰
॥अग्नेयेक्रमंतेत्वाजुष्टंनिर्वपामि॥अग्नेयेसुमतेयस्वाहेतिपूर्णाहुतिर्वा

स्मा० प्रा० ॥ ॥ अन्यगृह्याग्निनास्वगृह्यदहतिस्रुवाग्निनाग्निनोवैद्युतेनतु॥स्व
॥२२॥ गृह्याग्निसंसर्गेतुपवनिमित्तेऽपिसकल्पोऽत्रमन्त्रसमिध्यमारोप्यलोकि
कोनोपत्यवरोत्यतन्निमित्तप्रायश्चित्तस्रुवस्थालीपाकंकुर्यादितिप्राय
श्चित्तप्रदीपकृत्॥ ॥यर्वण्यश्चुपातेतु॥ममयर्वण्यश्चुपातनिमित्तमग्नेय
व्रतपतयेस्वाहेतिपूर्णाकृतिर्वा॥अथवातत्यर्वणिअश्चुपातनिमित्तम
ग्नेयव्रतपतयेस्वाहेति॥पूर्णाकृतिर्वा॥अथवातत्यर्वणिस्रुस्थालीपा
केनसमानतंत्रेकुर्यात्॥तद्यथा॥ममयर्वणिकर्मणिपर्वलोपनिमित्तम
ग्नेयव्रतपतयेस्थालीपाकंसंकल्पितंदर्शस्थालीपाकेनयक्ष्ये॥अग्नेयव्र
तपतनिर्वापस्ततःपूर्वप्रधानदेवतायाहोमोप्येवं॥पवित्रनाशेतु॥ ॥पवित्र ॥२२॥
नाशनिमित्तमग्नेयंपवित्रवंतस्थालीपाकंक॰॥अग्नेयंपवित्रवंतस्वाहेति॥

पूर्णाकृतिर्वा॥सर्वेष्वध्वरेषुतद्विध्वरेषुनिमित्तेसर्वेप्रायश्चित्तंकरिष्ये॥
सर्वेचःस्वःस्वाहेतिसर्वप्रायश्चित्तंजुहुयात्॥अनुक्तोक्तप्रायश्चित्तोत्तरम
पिसर्वत्रैवोदुच्यमिदं॥ ॥स्वयमग्निर्ज्वलनेतु॥स्वयमग्निर्ज्वलनेवगुण्प
रिहारार्थंमुद्दीप्यस्वेतिहुत्वाग्न्यासमिधावाधास्येतिसंकल्प्यद्दीप्यस्वजात
वेदोयद्धनिर्ऋतिंममपद्मेस्वमत्यमावहजीवनेचदिद्यूनादिद्यून॥मानोहि
